International Journal of Sanskrit Research 2021; 7(2): 157-159

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(2): 157-159
© 2021 IJSR
www.anantaajournal.com
Received: 16-10-2021
Accepted: 24-11-2021

**शम्भु मान्ना**
सहायकाचार्यः, संस्कृतविभागः
मुगवेडिया-गङ्गाधर-महाविद्यालयः
भूपतिनगरम्, पूर्वमेदिनीपुरम्, वेस्ट बंगाल, भारत

**Corresponding Author:**
**शम्भु मान्ना**
सहायकाचार्यः, संस्कृतविभागः
मुगवेडिया-गङ्गाधर-महाविद्यालयः
भूपतिनगरम्, पूर्वमेदिनीपुरम्, वेस्ट बंगाल, भारत

# पाणिनीयसंज्ञासूत्रविमर्शः

**शम्भु मान्ना**

**प्रस्तावना**

वैयाकरणनिकाये वैयाकरणाचार्याणामभ्यर्हितत्वेन भगवतः पाणिनिमुनेः नामकीर्तनं सर्वत्र दरीदृश्यते, तत्रभवता निखिलव्याकरणशास्त्रमौलीभूतम् 'अष्टाध्यायी' इति ग्रन्थरत्नं व्यरचि। तत्र केवलं सन्ति सूत्राणि, न तु व्याख्यानानि। ननु किं नाम सूत्रमिति जिज्ञासायां सूचनात् सूत्रमिति। सूचनात् सूत्रणाच्चैव सूत्रस्थानं प्रचक्षते। अर्थात् सूते सूचयति सूत्रयति वा सूत्रमिति सूत्र्यते ग्रथ्यते इति सूत्रम्। सूत्रविषये कुमारिलभट्टेन तन्त्रवार्त्तिके लिखितम्-

'सूत्रेष्वेव हि तत् सर्वं यद्वृत्तौ यच्च वार्त्तिके।
सूत्रं योनिरिहार्थानां सर्वं सूत्रे प्रतिष्ठितम्।।'[1] इति

वररुचिनोक्तम्-
'अल्पाक्षरमसन्धिग्धं सारवद् गूढ़निर्णयम्।
निर्द्दोषं हेतुमत् तुल्यं सूत्रमित्युच्यते बुधैः।।'[2] इति

मीमांसकैरपि भणितम्-
'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्व्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः।।'[3] इति

परं विष्णुधर्म्मोत्तरे पराशरोपपुराणे च लक्षितम्-
'स्वल्पाक्षरमसन्धिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।'[4] इति

अर्थात् अल्पाक्षरत्वं, सन्देहहीनत्वं, सारवत्त्वं, व्यापकार्थस्य प्रकाशकत्वं, अर्थविहीनशब्दहीनत्वं, विशुद्धविरचनत्वं चेत्यादिवैशिष्टययुक्तं भवति सूत्रम्। सर्वं सूत्रं द्विधा विभज्यते सामान्यविशेषभेदेन। तथाहि महाभाष्यकारेण पतञ्जलिना उक्तम्- 'किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्? उत्सर्गापवादौ।...सामान्येनोत्सर्गः कर्त्तव्यः। तद्यथा- 'कर्म्मण्यण्'। तस्य विशेषणापवादः। तद् यथा- 'आतोऽनुपसर्गे कः'[5]। सामान्यविशेषसूत्रविभागद्वयम् आदाय कुमारिलभट्टेनापि अवाचि-

'अवश्यमेव सामान्यं विशेषं प्रति गच्छति।
गतमात्रं च तत्तेन विशेषे स्थाप्यते ध्रुवम्।।'[6] इति

एतादृशसामान्यविशेषलक्षणान्वितसूत्रसमूहद्वारा विपुलशब्दराशिः आयत्तीभवति इति न अनृतम्। तदर्थं वृद्धोक्तिः श्रूयते-

'ऋषयोत्प्युपदेशस्य नान्तं यान्ति पृथक्त्वशः।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः।।'[7] इति

व्याकरणस्य सर्वं सूत्रं सामान्यतः यद्यपि प्रागुक्तलक्षणासमन्वितं तथापि प्रकारन्तरेण पुनः तानि (संज्ञा-परिभाषा-विधि-नियम-अतिदेशाधिकारभेदेन) षोढा प्रविभक्तानि। तथाहि विषयेऽस्मिन् एका कारिका प्रचलितास्ति-

‘संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।’[8] इति

अत्र कारिकायां ‘अतिदेशः’ इति शब्दस्य स्थाने ‘प्रतिषेधः’ इति शब्दस्य पाठः कैश्चित् क्रियते। प्रतिषेधः नाम निषेधः। निषेधोऽपि विधिविशेषः। शूलपाणिना उक्तम्- ‘सामान्यशास्त्रप्राप्त्युपजीवी स हि निषेधविधिर्वक्तव्यः। इतरथाऽभिधानादेव निषेधप्राप्तेरप्राप्तप्रापकत्वरूपं विधित्वञ्च न स्यात्, तथा चोपजीव्यबाधापत्तेरेव विधानासम्भवः।’[9] इति। निषेधस्य विध्यन्तर्गतत्वे अतिदेशकथने नास्ति आवश्यकता। तदर्थं कारिकायां प्रतिषेधपाठस्य स्थाने अतिदेशपाठः एव संगतः। परं कस्मिंश्चिदपि सम्प्रदाये अतिदेशस्य स्थाने प्रतिषेधः इत्युक्त्वा तैश्च पुनः कारिकैका पठ्यते-

‘अतिदेशोऽनुवादश्च विभाषा च निपातनम्।
एतच्चतुष्टयं ज्ञात्वा दशधा सूत्रमुच्यते।।’[10] इति

अतएव सूत्राणि दशविधानि इति तेषां नये परन्तु सूत्राणां षड्विधत्वं प्रसिद्धपदागतम्। षड्विधेषु प्रसिद्धेषु सूत्रेषु आद्यं संज्ञासूत्रम्।
संज्ञासूत्रस्य किं लक्षणम्? संज्ञाशब्दस्य साधारणः अर्थः हि नाम। संज्ञा खलु नाममात्रकथनम्। आकृतिमतो मांसपिण्डरूपव्यक्तिविशेषस्य नाम संज्ञा वा देवदत्तः। देवदत्तः इति अत्र संज्ञा बोधको वा, व्यक्तिविशेषः तस्य संज्ञा बोध्यो वेति संज्ञासंज्ञिप्रत्यायकं सूत्रं संज्ञासूत्रम्। लोके राम-श्याम-देवदत्तादिव्यक्तिवाचकसंज्ञाप्रयोगात् अनुपस्थिततत्वेऽपि परिज्ञातजनस्य परिज्ञानवत् शास्त्रोऽपि सप्तर्षि इत्यस्य शब्दस्य श्रवणेन कश्यपः अत्रिः वशिष्ठः विश्वामित्रः गौतमः जामदग्निः भरद्वाजश्चेति सप्तानां ऋषीणां बोधः जायते वैवस्वतमन्वोः समयात् आरभ्य इति उदाहरणादस्मात् सिद्धं भवति यत् शब्दशक्तेः अनेकेषामर्थानाम् अभिधानेषु सर्वात्मसमर्थसत्त्वेऽपि कस्मिंश्चित् विशेषार्थे तस्या नियन्त्रणकरणं हि संज्ञाविधानम्। कैयटेन महाभाष्यप्रदीपे शब्दार्थसम्बन्धस्य नित्यत्वप्रतिपादनावसरे एतत् स्पष्टीकृतम्- सर्वार्थाभिधानयोग्यशब्दस्य शक्तिनियमनमात्रं संज्ञाकरणमिति शब्दार्थसम्बन्धनित्यत्वस्यापि न विरोधः। तस्मात् शब्दार्थसम्बन्धस्य नित्यत्वे नास्ति कोऽपि विरोधः। परं सर्वार्थप्रकाशने सम्बन्धयुक्तशब्दस्य शक्तिद्वारा अर्थविशेषं प्रति नियन्त्रितत्वात् संज्ञाकरणमिति। अर्थविशेषे शब्दशक्तेः एतादृशविशेषनियमनात् लाघवप्रक्रिया संज्ञाव्यवहारदिशा अतीव समादरणीया। लाघवदृष्ट्या सर्वत्र शब्दव्यवहारः क्रियते। संज्ञाशब्दनिर्धारणेन तथा तत्प्रयोगेन लाघवस्य चरमसीमा अभिव्यञ्जिता व्यवहारेऽस्मिन्। शब्दशास्त्रनिष्णातस्य महर्षिपतञ्जलेः- ‘संज्ञा च नाम यतो न लघीयः’[11] इत्येतद्वचनोपरि उक्तविषयस्य स्वविवरणप्रस्तुतकृता कैयटेन महाभाष्यप्रदीपे एतादृशम् उद्धृतम्- ‘शब्दव्यवहारो लघुस्ततोऽपि लघीयो नाम’ इति। अर्थात् लाघवार्थं हि शब्दव्यवहारः, परन्तु ततोऽपि लाघवः संज्ञाशब्दः इति दृग्गोचरीभवति इत्येतदर्थं लघुभूतोपायेन ईप्सितविषयस्य अवबोधनाय संज्ञाशब्दस्य उपयोगः शास्त्रे वर्तते। व्याकरणशास्त्रस्य तु सर्वतोभावेन लाघवापेक्षितत्वात् तत्र संज्ञाशब्दं विना निर्दिष्टकार्य्यविधानम् असम्भवमिति प्रतीयते।
परन्तु विभिन्नेषु शास्त्रेषु दृश्यते काश्चन एतादृशाः शब्दाः सन्ति ये खलु साधारणार्थं व्यतिरिच्य कमपि विशेषार्थं पारिभाषिकार्थं च बोधयन्ति। शास्त्रेषु संज्ञा इत्यनेन एतादृशाः शब्दाः बोद्धव्याः। यथा गुणशब्दः। व्याकरणे गुणशब्दः अकार-एकार-ओकारान् बोधयति। सांख्यदर्शने तु सत्त्वं रजः तमश्चेति एतत्त्रयं गुणशब्देन उच्यते। न्यायनये गुणो भवति रूप-रस-गन्ध इत्यादयः चतुर्विंशतिः पदार्थाः। पुनश्च आलंकारिकाः गुणशब्देन प्रसाद-माधुर्यम् इत्यादिम् आद्रियन्ते। जगत्यस्मिन् साधारणजनैः यद्यपि दया-औदार्यमित्यादिकस्य अवबोधनाय गुणशब्दः व्यवह्रियते तथापि शास्त्रकृतः स्वस्वपारिभाषिके अर्थे एव शब्दस्य अस्य व्यवहारं कुर्वन्ति। शास्त्रेषु येभ्यः सूत्रेभ्यः व्यवहृतपारिभाषिकशब्दानाम् अर्थकथनं तानि सूत्राणि संज्ञात्मकानि भवन्ति। उदाहरणं यथा- ‘वृद्धिरादैच्’(१/१/१) सूत्रेऽस्मिन् उक्तं शब्दशास्त्रे आकारः ऐकारः औकारश्चेति वर्णत्रयं वृद्धिरिति नाम्ना अभिधीयते इति एतदर्थं वैयाकरणैः आभाषितम्- साक्षात् शक्तिग्राहकत्वं संज्ञासूत्रत्वम् इति। अस्मिन् सूत्रभाष्ये भाष्यकारेण पतञ्जलिनापि समीरितम्- ‘लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति। तयोरुपचारादन्येऽपि जानन्तीयमस्य संज्ञेति...। एवम् इहापि। इहैव तावत् केचिद् व्याचक्षाणा आहुः। वृद्धिशब्दः संज्ञा ऐचः संज्ञिन इति... तेन मन्यामहे यया प्रत्याय्यन्ते सा संज्ञा ये प्रतीयन्ते ते संज्ञिनः’[12] इति। सौपद्म-मौग्धबोध-सांक्षिप्तसारकादिगणोक्तम्- व्यवहारार्थं शास्त्रे कृतः संकेतः संज्ञा इति। तेन व्यवहारोपपत्त्यर्थं शास्त्रेषु यः संकेतः क्रियते नाम तस्य संज्ञा यथा अण्-एङ्-एच्-इत्यादयः। एतादृश्यः संज्ञाः ग्रन्थसंक्षेपणार्थं पाणिन्यादिव्याकरणे व्यवहृताः। इदानीं व्याकरणग्रन्थेषु अतीव प्राचीनः ग्रन्थो भवति अष्टाध्यायी इति। अस्मात् अष्टाध्यायीग्रन्थात् पूर्वमपि विद्यमाना आसीदियं प्रथा संज्ञाकरणे। कारणं हि शौनकस्य ऋक्प्रातिशाख्ये दृश्यते यत् नामी-गुरु-लघु इत्यादिशब्दाः व्यवहृताः आसन् संज्ञारूपेण। पुनः शौनकेभ्यः पूर्वमपि महर्षिशाकटायनेन तथा तदीये ऋक्तन्त्रव्याकरणे शब्दलाघवस्य कृते बहुविधाः संज्ञाः प्रयुक्ताः। यथा- समासस्थले ‘मास’ स्वरस्थले ‘र’ दीर्घस्थले ‘घ’ करणस्थले ‘रण’ इत्यादिरूपेण दृश्यते। अतएव संज्ञासूत्राणां विषये आदौ वक्तव्यमिति न असंगतम्।
महावैयाकरणाचार्यपाणिनिमुनेः अष्टाध्याय्यां प्रायेण साकल्येन सप्ताशीतिसंख्यकानि संज्ञासूत्राणि विद्यन्ते। संज्ञासूत्रेषु एतेषु केषाञ्चित् संज्ञासूत्राणां संज्ञात्वम् अधिकारत्वञ्चेति वैशिष्ट्यद्वयं परिलक्ष्यते। यथा- ‘प्रत्ययः’(३/१/१) इति सूत्रे उभयवैशिष्ट्यं वर्तते। एतेषां सर्वेषां संज्ञासूत्राणां वैशिष्ट्यानुसारं तानि विभिन्नदिशा विभक्तुं शक्यन्ते। आदौ कृत्रिमाकृत्रिमदिशा संज्ञासूत्राणां भेदद्वयं विद्यते। अत्र काः कृत्रिमाः संज्ञा इति जिज्ञासायामुच्यते याः खलु संज्ञाः वैयाकरणाचार्येण पाणिनिना कृताः ताः कृत्रिमाः संज्ञाः इति नाम्ना अभिधीयन्ते। याश्च न पाणिनिना कृताः अपि तु पाणिनेः प्राक् ये आचार्याः आसन् तैः कृताः ताः अकृत्रिमसंज्ञाः। अर्थात् एताः संज्ञाः परम्परादागताः आचार्याणाम् उपचारादेव। यथा- टि-घु-भ्वादयः कृत्रिमसंज्ञाः प्रातिपदिक-वृद्धि-गुण-सवर्ण-अनुनासिकेत्यादयश्च भवन्ति अकृत्रिमसंज्ञाः। द्वितीयतः शब्दगतगौरवलाघवदृष्ट्या संज्ञासूत्राणां भेदत्वं दृश्यते। एकाक्षरविशिष्टसंज्ञा लघ्वी संज्ञा तदधिकाक्षरविशिष्टसंज्ञा च गुरुसंज्ञा। गुरुसंज्ञा महतीसंज्ञा इति नाम्नापि अभिधीयते। परन्तु अत्र प्रश्नः जायते वैयाकरणैः यस्मात् अक्षरकृतलघुता बहुमन्यते तर्हि अक्षरकृतलघुसम्बन्धिनीं संज्ञाम् अकृत्वा एकाधिकाक्षरयुक्तसंज्ञा क्रियते एतेन किमपि प्रयोजनम् अस्ति न वा? तत्रोच्यते अवश्यमेव प्रयोजनं वर्तते एतत्करणे। तस्य किम् प्रयोजनम्? तथाहि महाभाष्यकारेणोक्तम्- ‘तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम्-अन्वर्थसंज्ञा यथा विज्ञायेत-करोति इति कारकम्’[13] इति। उदाहरणं यथा- कारके इति अधिकारसंज्ञासूत्रस्य व्युत्पत्तिविषयकमर्थमादाय कारकलक्षणं सुस्थिरं भवति। एवं प्रकारेण संज्ञासूत्रेषु काश्चन महासंज्ञाः क्रियन्ते आचार्यैः प्रयोजनसिद्ध्यर्थम्।
अपि च सर्वेषु संज्ञासूत्रेषु काश्चन प्रकृतिभागस्य संज्ञाः, काश्चन च प्रत्ययभागस्य संज्ञाः, पुनः काश्चन प्रकृतिप्रत्यययोस्तथा उभयभागस्य संज्ञारूपेण परिगण्यन्ते। प्रकृतिभागस्य संज्ञा का? येन संज्ञासूत्रेण प्रकृतेः नाम्नः शब्दस्य वा संज्ञा विधीयते तत् प्रकृतिरूपं संज्ञासूत्रम्। यथा- ‘अर्थवदधातुरप्रत्ययः प्रातिपदिकम्’(१/२/४५) इति संज्ञासूत्रमेकम्। सूत्रेण अनेन धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवतः शब्दस्वरूपस्य प्रातिपदिकसंज्ञा विधीयते। अतः संज्ञासूत्रमिदं प्रकृतिविषयकम्। यत् संज्ञासूत्रं प्रत्ययांशस्य संज्ञां करोति तत् प्रत्ययांशरूपात्मकं संज्ञासूत्रम्। यथा- ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाङ्योस्सुप्’(४/१/२) इति। पुनश्च येन सूत्रेण उभयभागस्य अर्थात् प्रकृतिभागस्य प्रत्ययांशस्य च सम्मेलनेन संज्ञा विधीयते तत् संज्ञासूत्रमिदम् उभयभागात्मकम्। यथा- ‘सुप्तिङन्तं पदम्’(१/४/१४) इति।
शब्दगतार्थगतदृष्ट्यापि संज्ञासूत्राणां विभेदः कर्तुं शक्यते। शब्दानां संज्ञा याभिः सूत्रैः विधीयन्ते ताः शब्दसंज्ञाः। यथा ‘वृद्धिरादैच्’(१/१/१) इति सूत्रे आकार-ऐकार-औकाराणां बोधः वृद्धिशब्दद्वारा भवति। अत्र आकार-ऐकार-औकाररूपवर्णात्मकशब्दस्य संज्ञाकरणात् शब्दसंज्ञा इत्युच्यते। अर्थसंज्ञायां तु अर्थस्य संज्ञा भवति। पाणिनीये तन्त्रे यानि संज्ञासूत्राणि वर्तन्ते तेषु कारकविधायकानि सूत्राणि अर्थसंज्ञात्मकानि एतानि व्यतिरिच्य सर्वं शब्दसंज्ञासूत्रात्मकम्। कारणं कारके अर्थस्य संज्ञा जायते न तु शब्दस्वरूपस्य। यथा- ‘बालकः अन्नं खादति’ इत्यस्मिन् वाक्ये अन्नम् इत्यत्र अर्थसंज्ञा भवति। एतावत्पर्यन्तं नानावैशिष्ट्यानुसारं शास्त्रगतसूत्रपरिशीलनमाध्यमेन च सर्वेषां संज्ञासूत्राणां वर्गीकरणं कृतं तत्तद्विभागानां दिग्दर्शनं समाहृत्य च आलोचनमपि जातम्।
‘प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते’ इति वचनात् शास्त्रेऽपि प्रयोजनं विना संज्ञानां प्रयोगो न भवति। अतएव या या संज्ञा सा सा प्रयोजनवती। संज्ञा खलु नाम। नाम्ना लोके कार्यं निर्वहति। तां विना दैनन्दिनजीवने कार्यसाधनं भवितुं न अर्हति। तथैव

शास्त्रेऽपि, संज्ञां विना शास्त्ररूपकार्यमसम्पूर्णं भवति। शास्त्रस्य सम्पूरणार्थं संज्ञया प्रयोजनम् अस्त्येव। प्रत्येकं शास्त्रेषु केचन पारिभाषिकशब्दाः तथा संज्ञाः वर्तन्ते। तत्तच्छास्त्रेषु तत्तच्छब्दानाम् अर्थाः अपि निर्दिष्टाः। यतः एकस्यैव शब्दस्य शास्त्रभेदे अर्थभेदः वर्तते इति पूर्वं मया आभाषितम्। तत्तच्छास्त्रगतशब्दानां तत्तदर्थविषये यदि आदौ ज्ञानं न स्यात् तर्हि तत्तच्छास्त्रान्तर्गतविषयाणामपि बोधो न भविष्यति शास्त्रविषयेषु तत्तच्छब्दान्तर्भावात्। अतएव प्रथमे संज्ञाज्ञानं करणीयम् अस्ति। एवं प्रकारेण अस्मिन् पाणिनीये व्याकरणसम्प्रदाये वैयाकरणाचार्यैः संज्ञायाः आदौ उल्लेखनं कृतम्। यतः परवर्तिसूत्रेषु संज्ञानां प्रयोगः दृश्यते। कस्यापि सूत्रस्य सम्पूर्णार्थः तत्सूत्रान्तर्गतपदस्य अर्थम् अन्तरेण न सम्भवति। यदि तत्सूत्रे अस्मिन् शास्त्रे व्यवहृतस्य कस्यापि संज्ञाशब्दस्य प्रयोगः तिष्ठति तर्हि अस्मच्छास्त्रगतः तत्संज्ञाशब्दस्य योऽर्थः निर्दिष्टः तमर्थं विना तत्सूत्रस्य सम्पूर्णार्थः न जायते इति इत्येतदर्थं संज्ञायाः प्राथम्यं स्वीकार्यम्। उदाहरणं यथा- 'अणुदित्सवर्णस्य चाप्रत्ययः'(१/१/६९) इत्यस्मिन् अनेकपदात्मके सूत्रे सवर्णस्य इति एकं पदं वर्तते। अस्य अर्थविषयकं यदि ज्ञानं न भवति तर्हि सूत्रार्थः असम्पूर्णो भवति। शास्त्रेऽस्मिन् आचार्येण 'तुल्यास्यप्रयत्नं सवर्णम्'(१/१/९) इति सवर्णसंज्ञा कृता। अत्र सवर्णम् इति संज्ञा तुल्यास्यप्रयत्नं तु संज्ञि। अतएव सवर्णसंज्ञया तुल्यास्यप्रयत्नम् इति संज्ञिरूपार्थस्य बोधः जायते। 'अणुदित्सवर्णस्य चाप्रत्ययः'(१/१/६९) अस्मिन् सूत्रे सवर्णसंज्ञारूपशब्दस्य अर्थबोधनाय पूर्वम् आचार्यैः सवर्णसंज्ञा कृता। तत्सवर्णसंज्ञाकृतम् अर्थमाश्रित्य सूत्रस्यास्य सम्पूर्णार्थो भवति। यदि पूर्वं संज्ञायाः ज्ञानं न स्यात् तर्हि परवर्तिसूत्राणां न अर्थबोधः इति एतदर्थं संज्ञाज्ञानं पूर्वं स्यात्। अपि तु वैयाकरणैः संज्ञायाः प्राथम्यरूपः यः सिद्धान्तः कृतः इति तु समीचीनमेव। पाणिनेः अष्टाध्याय्यां वैदिकलौकिकोभयव्याकरणस्य विद्यमानत्वात् वेदमन्त्राणामपि यथार्थबोधाय आदौ देवतादिसंज्ञाशब्दज्ञानम् अपरिहार्यम् इत्येतदर्थं शौनकेन बृहद्देवतायाम् उक्तम्-

'अवश्यं वेदितव्यो हि नाम्नां सर्वस्य विस्तरः।
न हि नामान्यविज्ञाय मन्त्राः शक्या हि वेदितुम्।।'[14] इति

तस्मात् संज्ञाशब्दज्ञानं विना वेदमन्त्राणां तात्पर्यार्थबोधने यथा अविद्या मा भूत् तदर्थं तज्ज्ञानम् अत्यन्तम् आवश्यकम्। तत्संज्ञाशब्दस्य तथा तस्य स्वरूपनिर्धारणं सृष्टेः प्राक् ब्रह्मणा कृतम् इति 'नामरूपे व्याकरवाणि'[15], 'स भूरिति व्याहरत्, स भूमिमसृजत्'[16] इत्यादिवचनात् अवगम्यते। एतदपि वक्तुं शक्यते यत् नाम विना रूपस्य कोऽपि व्यवहारः न सम्पद्यते इति वचनसिद्ध्यर्थम् एवं कृतं परमेश्वरेण। सर्वेषु शास्त्रेषु विशेषतया व्याकरणशास्त्रे संज्ञाशब्दस्य अपरिहार्यत्वं वर्तते इति निश्चप्रचम्।

## संदर्भ सूची


1. त.वा.२६३
2. व्या.द.इति.(प्र. गुरुपदहालदारः) पृ०-३५७
3. ब्र.सू.१।१।१
4. विष्णुधर्मोत्तरे पराशरोपपुराणे च वर्तते
5. व्या.महा.(संशो. भार्गवशास्त्री) प्र.ख.,पृ.-५५
6. त.वा.
7. शा.भा.२।१।१७
8. गोयीचन्द्रः-१
9. श्राद्धविवेक ८२
10. व्या.द.इति.(प्र. गुरुपदहालदारः) पृ.-३८१
11. मः भाः १।१।२७
12. व्या.महा.(संशो. भार्गवशास्त्री) प्र.ख.,पृ.-१५७
13. व्या.महा.(संशो. भार्गवशास्त्री) द्वि.ख.,पृ.-२४२
14. वृह.१।४
15. छाण्उप. ६।३
16. तै.व्रा.उप.२।२।४।२
17. अष्टाध्यायी मन्थन इति ग्रन्थः सत्यमानन्दब्रह्मचारिणा सम्पादितःए सम्पूर्णानन्दसंस्कृतविश्वविद्यालयःए वाराणसीए २००६.
18. काशिका जयादित्यवामनविरचिताए जयशङ्करलालत्रिपाठी इत्यनेन सम्पादिता सुधाकरमालवीयश्चए तारा-वुक्-एजेन्सीए वाराणसीए २००९ (प्रथमसंस्करणम्ए पुनर्मुद्रणम्).
19. परिभाषेन्दुशेखरः नागेशभट्टकृतःए विजयाख्यव्याख्यया समलङ्कृतःए जयदेवशर्ममिश्रः इत्यनेन व्याख्यातःए चौखम्बा-विद्याभवनम्ए वाराणसीए २००९.
20. परिभाषेन्दुशेखरः नागेशभट्टप्रणीतःए चन्द्रिकाबालबोधिनीटीकोपेतःए सत्यनारायणमूर्तिणा सम्पादितःए राष्ट्रीय-संस्कृत-विद्यापीठम्ए तिरुपतिःए २००४.
21. परिभाषेन्दुशेखरः नागेशभट्टप्रणीतःए म.म.कै.तात्याशास्त्रिणा सम्पादितःए चौखम्बा-सुरभारती-प्रकाशनम्ए वाराणसीए २०१२(प्रथमसंस्करणम्)
22. परिभाषेन्दुशेखरः नागेशभट्टप्रणीतःए हर्षनाथमिश्रेण सम्पादितःए राष्ट्रीय-संस्कृत-संस्थानम्ए नव-देहलीए २०१० (तृतीयसंस्करणम्).
23. परिभाषेन्दुशेखरः नगेशभट्टप्रणीतःए सुबोधिनी हिन्दिव्याख्योपेतःए विश्वनाथमिश्रेण सम्पादितःए चौखम्बा-सुरभारती-प्रकाशनम्ए वाराणसीए २०१६.
24. परिभाषासूत्र ओ इष्टिवचन इति ग्रन्थः पशुपतिचन्देन सम्पादितःए सदेशःए कलकाताए ख्रिष्टाब्दः २००४ (प्रथमसंस्करणम्).
25. पाणिनीय वैदिक व्याकरण इति ग्रन्थः अशोककुमारवन्द्योपाध्यायेन सम्पादितःए संस्कृत-पुस्तक-भाण्डारःए कलकाताए शकाब्दः १४१८ (द्वितीयप्रकाशनम्).
26. महाभाष्यम् पतञ्जलिप्रणीतम्ए गङ्गाधरकरन्यायाचार्येण सम्पादितम्ए संस्कृत-वुक्- डिपोए कलिकाताए २००२ (प्रथमसंस्करणम्).
27. महाभाष्यं पतञ्जलिप्रणीतम्ए हरिनारायणतिवारी इत्यनेन सम्पादितम्ए चोखम्बा-विद्याभवनम्ए वाराणसीए २००९.
28. वालशिक्षा भवानीशङ्करशर्मणा सम्पादिताए राष्ट्रीयसंस्कृतसंस्थानम्ए नव-देहलीए २००६ (प्रथमसंस्करणम्).
29. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितविरचिताए अयोध्यानाथ-सान्यालशास्त्रिणा सम्पादिताए वर्धमान्-विश्वविद्यालयःए वर्धमान्ए १४१४ (चतुर्थमुद्रणम्).
30. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितविरचिताए मृणालकान्तिगङ्गोपाध्यायः सम्पादिताए संस्कृत-वुक्-डिपोए कलकाताए १४२० (द्वितीयपुनर्मुद्रणम्).
31. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितविरचिताए शर्मालक्षी इत्यनेन सम्पादिताए चौखम्बा-सुरभारती-प्रकाशनम्ए वाराणसीए २०१६(प्रथम संस्करणम्).
32. वैयाकरणसिद्धान्तकौमुदी (अजन्तपुंलिङ्गप्रकरणम्) भट्टोजिदीक्षितप्रणीताए संकलकः व्याख्याकारश्च अशोककुमारपण्डाए प्रग्रेसिभ्-पावलिशार्स्ए कलकाताए २०१२ (प्रथमप्रकाशनम्).
33. वैयाकरणसिद्धान्तकौमुदी (तिङन्तप्रकरणम्) भट्टोजिदीक्षितप्रणीताए पार्वतिचक्रवर्तिना धीरेन्द्रकुमारदासेन च सम्पादिताए संस्कृत-वुक्-डिपोए कलिकाताए २०१४ (प्रथमसंस्करणम्ए चतुर्थमूद्रणम्).
34. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितप्रणीताए शिवप्रसादशर्मणा सम्पादिताए चौखम्बा-विद्याभवनम्ए २००९ (प्रथमसंस्करणम्).
35. वैयाकरणसिद्धान्तकौमुदी (विभक्त्यर्थप्रकरणम्) भट्टोजिदीक्षितप्रणीताए श्रीधरानन्दघिण्डियाल इत्यनेन सम्पादिताए मतिलाल-वानारसिदासःए दिल्लीए २००४ (प्रथमसंस्करणम्ए सप्तमुद्रणम्).
36. व्याकरणमहाभाष्यं पतञ्जलिप्रणीतम्ए भार्गवशास्त्रिजोशी इत्यनेन संशोधितम्ए चौखम्बा-संस्कृत-प्रतिष्ठानम्ए दिल्लीए २०१४(पुनर्मुद्रणम्).
37. व्याकरण दर्शनेर इतिहास इति ग्रन्थः गुरुपदहालदारप्रणीतःए संस्कृत-वुक्-डिपोए कलिकाताए वङ्गाब्दः १४१२ (द्वितीयप्रकाशनम्).